ग्रहावेशौषधिविषक्रोधभीशोककामजः ॥
अभिषङ्गाद्ग्रहेणास्मिन् कस्मात्त्रासरोदने ।
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः ॥*॥
विषान्मूर्च्छातिसारास्यश्यावता दाहहृद्भ्रमः ।
क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे ॥
कामाद्भ्रमोऽरुचिर्द्दाहो ह्रीनिद्राधीधृतिक्षयः ॥
ग्रहादौ सन्निपातस्य रूपादौ मरुतस्तयोः ॥
कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ।
सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ ॥*॥
तत्राभिचारिकैर्म्मन्त्रैर्हूयमानस्य तप्यते ।
पूर्व्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः ॥
सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः ।
इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः ॥
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्व्वहिराश्रयः ।
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ॥
पूर्व्वं शरीरे शारीरे तापो मनसि मानसे ।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ॥
दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः ।
ज्वरोऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः ॥
वहिरेव वहिर्व्वेगे तापोऽपि च सुसाधितः ।
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥
वैकृतोऽन्यः सुदुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ।
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ॥
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः ।
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥
कफो वसन्ते तमपि वातपित्तं भवेदनु ।
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥
सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ।
ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्व्वहुमूत्रता ॥
न प्रवृत्तिर्न विजीर्णा न क्षुत् सामज्वराकृतिः ।
ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥
जीर्णतामविपर्य्यासात् सप्तरात्रञ्च लङ्घनात् ।
ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ॥
प्रायशः सन्निपातेन भूयसा ह्युपदिश्यते ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः ॥
तापयन्तस्तनूं सर्व्वां तुल्यदूष्यादिवर्द्धिताः ।
बलिनो गुरवस्तद्वद्विशेषेण रसान्विताः ॥
सततं निष्प्रतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् ।
मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत्ततः ॥
सर्व्वाकाररसादीनां शुद्ध्याशुद्ध्यापि वा क्रमात् ।
वातपित्तकफैः सप्तदशद्वादशवासरान् ॥
प्रायोऽनुयाति मर्य्यादां मोक्षाय च वधाय च ।
इत्यग्निवेशस्य मतं हारीतस्य पुनः स्मृतिः ॥
द्विगुणा सप्तमी या च नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥
शुद्ध्यशुद्धौ ज्वरः कालं दीर्घमप्यत्र वर्त्तते ।
कृशानां व्याधियुक्तानां मिथ्याहारादिसेविनाम् ॥
अल्पोऽपि दोषो दुष्ट्यादेर्लब्ध्वान्यतमतो बलम् ।
स प्रत्यनीको विषमं यस्मात् वृद्धिक्षयान्वितः ॥
सोऽरिपक्षो ज्वरं कुर्य्याद्विषमं क्षयवृद्धिभाक् ।
दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बली ॥
निवर्त्तते पुनश्चैव प्रत्यनीकबलाबलः ।
क्षीणदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥
लीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः ।
आसन्नविवृतास्यत्वात् स्रोतसां रसवाहिनाम् ॥
आशु सर्व्वस्य वपुषो व्याप्तिर्द्दोषेण जायते ।
सन्ततः सततस्तेन विपरीतो विपर्य्ययात् ॥
विषमो विषमारम्भः क्षपाकालेन सङ्गवान् ।
दोषो रक्ताश्रयः प्रायः करोति सन्ततं ज्वरम् ॥
अहोरात्रस्य सन्धिः स्यात् सकृदन्येद्युराश्रितः ।
तस्मिन्मांसवहा नाड़ी मेदोनाड़ी तृतीयके ॥
ग्राही पित्तानिलान्मूर्द्ध्नस्त्रिकस्य कफपित्ततः ।
स पृष्ठस्यानिलकफात् स चैकाहान्तरः स्मृतः ॥
चतुर्थको मलैर्म्मेदो मज्जास्थ्यन्यतरस्थिते ।
मज्जास्थस्त्वपरः प्रभावमनुदर्शयेत् ॥
द्विविधं कफेन जङ्घाभ्यां स पूर्व्वं शिरसोऽनिलात् ।
अस्थिमज्जोपगते चातुर्थकविपर्य्ययः ॥
त्रिधा त्र्यहं ज्वरयति दिनमेकञ्च मुञ्चति ।
बलाबलेन दोषाणामनुचेष्टादिजन्मनाम् ॥
पक्वानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत् ।
ज्वरः स्यात् मनसस्तद्वत् कर्म्मणश्च तदा तदा ॥
गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात् ।
तुल्यो व्ययाच्च दोषाणां दुश्चिकित्स्यश्चतुर्थकः ॥
सूक्ष्मात् सूक्ष्मतरास्येषु दूराद्दूरतरेषु च ।
दोषो रक्तादिमार्गेषु शनैरल्पश्चिरेण यत् ॥
याति देहञ्च नाशेषं सन्तापादीन् करोत्यतः ।
क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः ॥
विषमो विषमारम्भः क्षपाकालानुसारवान् ।
यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम् ॥
कालेनाप्नोति सदृशान् स रसादींस्तथा तथा ।
दोषो ज्वरयति कृच्छ्रश्चिराच्चिरतरेण च ॥ * ॥
भूमौ स्थितं जलैः सिक्तं कालमेव प्रतीक्षते ।
अङ्कुराय यथा बीजं दोषबीजं भवेत्तथा ॥
वेगं कृत्वा विषं यद्वदाशये लीयते बलम् ।
कुप्यत्याप्तबलं भूयः काले दोषविषं तथा ॥
एवं ज्वराः प्रवर्त्तन्ते विषमाः सततादयः । * ।
उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम् ॥
अरोचको वमिः श्वासः सर्व्वस्मिन् रसगे ज्वरे ।
रक्तनिष्ठीवनं तृष्णा अक्ष्णोस्तु पिड़कोद्गमः ॥
दाहरागभ्रममदप्रलापो रक्तसंश्रिते ।
तृड्ग्लानिस्सृष्टवर्च्चस्कमन्तर्द्दाहो भ्रमस्तमः ॥
दौर्ब्बल्यं गात्रविक्षेपो मांसस्थे मेदसि स्थिते ।
स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यं चासहिष्णुता ॥
प्रलापो ग्लानिररुचिरस्थिगे त्वस्थिभेदनम् ।
दोषप्रवृत्तिरूर्द्धाधःश्वासाङ्गक्षेपकूजनम् ॥
अन्तर्द्दाहो वहिःशैत्यं श्वासो हिक्का च मज्जगे ।
तमसो दर्शनं मर्म्मच्छेदनं स्तब्धमेढ्रता ॥
शुक्रप्रवृत्तिर्म्मृत्युश्च जायते शुक्रसंश्रये ।
उत्तरोत्तरदुःसाध्याः पञ्चान्ये तु विपर्य्यये ॥
प्रलिम्पन्निव गात्राणि श्लेष्मणा गौरवेण च ।
मन्दज्वरः प्रलापस्तु सशीतः स्यात् प्रलेपकः ॥
शीतं मन्दज्वरो रूक्षः शीतः कृच्छ्रेण गच्छति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेदङ्गबलाशकः ॥ * ॥
हरिद्राभेदवर्णाभस्तद्वल्लेपः प्रमेहति ।
स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः ॥
कफवातौ समौ यत्र हीनपित्तस्य देहिनः ।
तीक्ष्णोऽथवा दिवा मन्दो जायते रात्रिजो ज्वरः ॥
दिवाकरापीतबले व्यायामाच्च विशोषिते ।
शरीरे नियतस्थाता ज्वरः स्यात् पौर्व्वरात्रिकः ।
आमाशये यदा दुष्टे श्लेष्मपित्ते ह्यधःस्थिते ।
तदार्द्धं शीतलं देहे त्वर्द्धं चोष्णं प्रजायते ॥*॥
काये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः ।
उष्णत्वं तेन देहस्य शीतत्वं करपादयोः ॥ * ॥
रसरक्ताश्रयः साध्यो मांसमेदोगतश्च यः ।
अस्थिमज्जागतः कृच्छ्रस्तैस्तैः साङ्गैर्हतप्रभः ॥*॥
विसंज्ञो ज्वरवेगार्त्तः सक्रोध इव वीक्ष्यते ।
सदोषशब्दञ्च शकृद्द्रवं सृजति वेगवत् ॥ * ॥

देहो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः क्षवः प्रकृतिगामि मनोऽन्नलिप्सा
कण्डूश्च मूर्द्ध्नि विगतज्वरलक्षणानि ॥

इत्यादि महापुराणे गारुड़े ज्वरनिदानं समाप्तम् । १५२ अध्यायः ॥
अथ ज्वरस्य चिकित्सा ।

धन्वन्तरिरुवाच ।

“ज्वरोऽष्टधा पृथक् द्वन्द्वसंघातागन्तुजः स्मृतः ।
मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये ॥१॥
नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम् ॥२॥
आरग्वधाभयामुस्ततिक्तग्रन्थिकनिर्म्मितः ।
कषायः पाचनं सामे सशूले च ज्वरे हितः ॥३॥
मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥४
छिन्नद्विशालात्रिफलाकटुकारग्वधैः कृतः ।
सक्षारो भेदनं क्वाथः पेयः सर्व्वज्वरापहः ॥५॥
महौषध्यमृतामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥६॥
अपामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः ।
बद्धा वारे रवेर्नूनं ज्वरं हन्ति तृतीयकम् ॥७॥
गङ्गाया उत्तरे कूले ह्यपुत्रस्तापसो मृतः ।
तस्मै तिलोदकं दद्यान्मुच्यत्यैकाहिको ज्वरः ॥८॥
गुड़ूच्याः क्वाथकल्काभ्यां त्रिफलाया वृषस्य च ।
मृद्वीकाया बलायाश्च सिद्धाः स्नेहाः ज्वरच्छिदः ॥ ९ ॥
धात्री शिवा कणा वह्निः क्वाथः सर्व्वज्वरान्तकः ॥१०
ज्वरातिसारहरणमौषधं प्रवदाम्यथ ।
पृश्निपर्णीबलाविल्वनागरोत्पलधान्यकैः ॥
पाठेन्द्रयवभूनिम्बमुस्तपर्पटकाः स्मृताः ।
जयन्त्याममतीसारज्वरं समहौषधाः ॥ ११ ॥
नागरातिविषामुस्तभूनिम्बामृतवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सर्व्वातिसारनाशनः ॥१२॥
मुस्तपर्पटकोदीच्यशृङ्गवेरशृतं पयः ।